# ShridakShinamUrtisahasranamastotram 2

# શ્રીદક્ષિણામૂર્તિસહસ્રનામસ્તોત્રમ્ ૨

## Document Information

Text title : shrIdakShiNAmUrtisahasranAmastotra 2

File name : dakShiNAmUrtisahasranAmastotra2.itx

Category : sahasranAma, shiva

Location : doc_shiva

Transliterated by : Sivakumar Thyagarajan shivakumar24 at gmail.com

Proofread by : Sivakumar Thyagarajan shivakumar24 at gmail.com

Source : Shri AtmanAtha Stuti Manjari, Mahaperiaval Trust

Acknowledge-Permission: Shri Gopal of Mahaperiaval Trust

Latest update : August 27, 2015

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 11, 2023

*sanskritdocuments.org*

# શ્રીદક્ષિણામૂર્તિસહસ્રનામસ્તોત્રમ્ ૨

શ્રીગણેશાય નમઃ ।

આદિદેવો દયાસિન્ધુરખિલાગમદેશિકઃ ।
દક્ષિણામૂર્તિરતુલઃ શિક્ષિતાસુરવિક્રમઃ ॥ ૧॥

કૈલાસશિખરોલ્લાસી કમનીયનિજાકૃતિઃ ।
વીરાસનસમાસીનો વીણાપુસ્તલસત્કરઃ ॥ ૨॥

અક્ષમાલાલસત્પાણિશ્ચિન્મુદ્રિતકરામ્બુજઃ ।
અપસ્મારોપરિન્યસ્તસવ્યપાદસરોરુહઃ ॥ ૩॥

ચારુચામીકરાકારજટાલાર્પિતચન્દ્રમાઃ ।
અર્ધચન્દ્રાભનિટિલપાટીરતિલકોજ્જ્વલઃ ॥ ૪॥

કરુણાલહરીપૂર્ણ કર્ણાન્તાયતલોચનઃ ।
કર્ણદિવ્યોલ્લસદ્દિવ્યમણિકુણ્ડલમણ્ડિતઃ ॥ ૫॥

વરવજ્રશિલાદર્શપરિભાવિકપોલભૂઃ ।
ચારુચામ્પેયપુષ્પાભનાસિકાપુટરઞ્જિતઃ ॥ ૬॥

દન્તાલિકુસુમોત્કૃષ્ટકોમલાધરપલ્લવઃ ।
મુગ્ધસ્મિતપરીપાકપ્રકાશિતરદાઙ્કુરઃ ॥ ૭॥

અનાકલિતસાદૃશ્યચિબુકશ્રીવિરાજિતઃ ।
અનર્ઘરત્નગ્રૈવેય વિલસત્કમ્બુકન્ધરઃ ॥ ૮॥

માણિક્યકઙ્કણોલ્લાસિ કરામ્બુજવિરાજિતઃ ।
મુક્તાહારલસત્તુઙ્ગ વિપુલોરસ્કરાજિતઃ ॥ ૯॥

આવર્તનાભિરોમાલિવલિત્રયયુતોદરઃ ।
વિશઙ્કુટકટિન્યસ્ત વાચાલ મણિમેખલઃ ॥ ૧૦॥

કરિહસ્તોપમેયોરુરાદર્શોજ્જ્વલજાનુકઃ ।

કન્દર્પતૂણીજિજ્જઙ્ઘો ગુલ્ફોદઞ્ચિતનૂપુરઃ ॥ ૧૧॥

મણિમઞ્જીર કિરણ કિઞ્જલ્કિતપદામ્બુજઃ ।
શાણોલ્લીઢમણિશ્રેણીરમ્યાઙ્ઘ્રિનખમણ્ડલઃ ॥ ૧૨॥

આપાદકર્ણકામુક્તભૂષાશતમનોહરઃ ।
સનકાદિમહાયોગિસમારાધિતપાદુકઃ ॥ ૧૩॥

યક્ષકિન્નરગન્ધર્વસ્તૂયમાનાત્મવૈભવઃ ।
બ્રહ્માદિદેવવિનુતો યોગમાયાનિયોજકઃ ॥ ૧૪॥

શિવયોગી શિવાનન્દઃ શિવભક્તિસમુત્તરઃ ।
વેદાન્તસારસન્દોહઃ સર્વસત્વાવલમ્બનઃ ॥ ૧૫॥

વટમૂલાશ્રયો વાગ્મી માન્યો મલયજપ્રિયઃ ।
સુખદો વાઞ્છિતાર્થજ્ઞઃ પ્રસન્નવદનેક્ષણઃ ॥ ૧૬॥

કર્મસાક્ષી કર્મમા(યા)યી સર્વકર્મફલપ્રદઃ ।
જ્ઞાનદાતા સદાચારઃ સર્વપાપવિમોચનઃ ॥ ૧૭॥

અનાથનાથો ભગવાન્ આશ્રિતામરપાદપઃ ।
વરપ્રદઃ પ્રકાશાત્મા સર્વભૂતહિતે રતઃ ॥ ૧૮॥

વ્યાઘ્રચર્માસનાસીનઃ આદિકર્તા મહેશ્વરઃ ।
સુવિક્રમઃ સર્વગતો વિશિષ્ટજનવત્સલઃ ॥ ૧૯॥

ચિન્તાશોકપ્રશમનો જગદાનન્દ કારકઃ ।
રશ્મિમાન્ ભુવનેશાનો દેવાસુર સુપૂજિતઃ ॥ ૨૦॥

મૃત્યુઞ્જયો વ્યોમકેશઃ ષટ્ત્રિંશત્તત્વસઙ્ગ્રહઃ ।
અજ્ઞાતસમ્ભવો ભિક્ષુરદ્વિતીયો દિગમ્બરઃ ॥ ૨૧॥

સમસ્તદેવતામૂર્તિઃ સોમસૂર્યાગ્નિલોચનઃ ।
સર્વસામ્રાજ્યનિપુણો ધર્મમાર્ગપ્રવર્તકઃ ॥ ૨૨॥

વિશ્વાધિકઃ પશુપતિઃ પશુપાશવિમોચકઃ ।
અષ્ટમૂર્તિર્દીપ્તમૂર્તિર્નામોચ્ચારણમુક્તિદઃ ॥ ૨૩॥

સહસ્રાદિત્યસઙ્કાશઃ સદાષોડશવાર્ષિકઃ ।
દિવ્યકેલીસમાયુક્તો દિવ્યમાલ્યામ્બરાવૃતઃ ॥ ૨૪॥

અનર્ઘરત્નસમ્પૂર્ણો મલ્લિકાકુસુમપ્રિયઃ ।
તપ્તચામીકરાકારઃ ક્રુદ્ધદાવાનલાકૃતિઃ ॥ ૨૫॥

નિરઞ્જનો નિર્વિકારો નિજા(રા)વાસો નિરાકૃતિઃ ।
જગદ્ગુરુર્જગત્કર્તા જગદીશો જગત્પતિઃ ॥ ૨૬॥

કામહન્તા કામમૂર્તિઃ કલ્યાણો વૃષવાહનઃ ।
ગઙ્ગાધરો મહાદેવો દીનબન્ધવિમોચનઃ ॥ ૨૭॥

ધૂર્જટિઃ ખણ્ડપરશુઃસદ્ગુણો ગિરિજાસખઃ ।
અવ્યયો ભૂતસેનેશઃ પાપઘ્નઃ પુણ્યદાયકઃ ॥ ૨૮॥

ઉપદેષ્ટા દૃઢપ્રજ્ઞો રુદ્રો રોગવિનાશકઃ ।
નિત્યાનન્દો નિરાધારો હરો દેવશિખામણિઃ ॥ ૨૯॥

પ્રણતાર્તિહરઃ સોમઃ સાન્દ્રાનન્દો મહામતિઃ ।
આશ્ચ(ઐશ્વ)ર્યવૈભવો દેવઃ સંસારાર્ણવતારકઃ ॥ ૩૦॥

યજ્ઞેશો રાજરાજેશો ભસ્મરુદ્રાક્ષલાઞ્છનઃ ।
અનન્તસ્તારકઃ સ્થાણુઃસર્વવિદ્યેશ્વરો હરિઃ ॥ ૩૧॥

વિશ્વરૂપો વિરૂપાક્ષઃ પ્રભુઃ પરિવૃઢો દૃઢઃ ।
ભવ્યો જિતારિષડ્વર્ગો મહોદારોઽઘનાશનઃ ॥ ૩૨॥

સુકીર્તિરાદિપુરુષો જરામરણવર્જિતઃ ।
પ્રમાણભૂતો દુર્જ્ઞેયઃ પુણ્યઃ પરપુરઞ્જયઃ ॥ ૩૩॥

ગુણાકરો ગુણશ્રેષ્ઠઃ સચ્ચિદાનન્દ વિગ્રહઃ ।
સુખદઃ કારણં કર્તા ભવબન્ધવિમોચકઃ ॥ ૩૪॥

અનિર્વિણ્ણો ગુણગ્રાહી નિષ્કલઙ્કઃ કલઙ્કહા ।
પુરુષઃ શાશ્વતો યોગી વ્યક્તાવ્યક્તઃ સનાતનઃ ॥ ૩૫॥

ચરાચરાત્મા વિશ્વાત્મા વિશ્વકર્મા તમોઽપહૃત્ ।
ભુજઙ્ગભૂષણો ભર્ગસ્તરુણઃ કરુણાલયઃ ॥ ૩૬॥

અણિમાદિગુણોપેતો લોકવશ્યવિધાયકઃ ।
યોગપટ્ટધરો મુક્તો મુક્તાનાં પરમા ગતિઃ ॥ ૩૭॥

ગુરુરૂપધરઃ શ્રીમાન્ પરમાનન્દસાગરઃ ।
સહસ્રબાહુઃ સર્વેશઃ સહસ્રાવયવાન્વિતઃ ॥ ૩૮॥

સહસ્રમૂર્ધા સર્વાત્મા સહસ્રાક્ષઃ સહસ્રપાત્ ।
નિર્વિકલ્પો નિરાભાસઃ શાન્તઃ સૂક્ષ્મઃ પરાત્પરઃ ॥ ૩૯॥

સર્વાત્મકઃ સર્વસાક્ષી નિસ્સઙ્ગો નિરુપદ્રવઃ ।
નિર્લેપઃ સકલાધ્યક્ષઃ ચિન્મયસ્તમસઃ પરઃ ॥ ૪૦॥

જ્ઞાનવૈરાગ્યસમ્પન્નો યોગાનન્દમયઃ શિવઃ ।
શાશ્વતૈશ્વર્યસમ્પૂર્ણો મહાયોગીશ્વરેશ્વરઃ ॥ ૪૧॥

સહસ્રશક્તિસંયુક્તઃ પુણ્યકાયો દુરાસદઃ ।
તારકબ્રહ્મ સમ્પૂર્ણઃ તપસ્વિજનસંવૃતઃ ॥ ૪૨॥

વિધીન્દ્રામરસમ્પૂજ્યો જ્યોતિષાં જ્યોતિરુત્તમઃ ।
નિરક્ષરો નિરાલમ્બઃ સ્વાત્મારામો વિકર્તનઃ ॥ ૪૩॥

નિરવદ્યો નિરાતઙ્કો ભીમો ભીમપરાક્રમઃ ।
વીરભદ્રઃ પુરારાતિર્જલન્ધરશિરોહરઃ ॥ ૪૪॥

અન્ધકાસુરસંહર્તા ભગનેત્રભિદદ્ભુતઃ ।
વિશ્વગ્રાસોઽધર્મશત્રુર્બ્રહ્મજ્ઞાનૈ(નન્દૈ)કમન્દિરઃ ॥ ૪૫॥

અગ્રેસરસ્તીર્થભૂતઃ સિતભસ્માવગુણ્ઠનઃ ।
અકુણ્ઠમેધાઃ શ્રીકણ્ઠો વૈકુણ્ઠપરમપ્રિયઃ ॥ ૪૬॥

લલાટોજ્જ્વલનેત્રાબ્જઃ તુષારકરશેખરઃ ।
ગજાસુરશિરશ્છેત્તા ગઙ્ગોદ્ભાસિતમૂર્ધજઃ ॥ ૪૭॥

કલ્યાણાચલકોદણ્ડઃ કમલાપતિસાયકઃ ।
વારાં શેવધિતૂણીરઃ સરોજાસનસારથિઃ ॥ ૪૮॥

ત્રયીતુરઙ્ગસઙ્ક્રાન્તો વાસુકિજ્યાવિરાજિતઃ ।
રવીન્દુચરણાચારિધરારથવિરાજિતઃ ॥ ૪૯॥

ત્રય્યન્તપ્રગ્રહોદારઃ ઉડુકણ્ઠારવોજ્જ્વલઃ ।
ઉત્તાનભલ્લવામાઢ્યો લીલાવિજિતદાનવઃ ॥ ૫૦॥

જાતુ પ્રપઞ્ચજનિતજીવનોપાયનોત્સુકઃ ।
સંસારાર્ણવસમ્મગ્ન સમુદ્ધરણપણ્ડિતઃ ॥ ૫૧॥

મત્તદ્વિરદધિક્કારિગતિવૈભવમઞ્જુલઃ ।

મત્તકોકિલમાધુર્ય રસનિર્ભરનિસ્વનઃ ॥ ૫૨॥

કૈવલ્યોદિતકલ્લોલલીલાતાણ્ડવપણ્ડિતઃ ।
વિષ્ણુર્જિષ્ણુર્વાસુદેવઃ પ્રભવિષ્ણુઃ પુરાતનઃ ॥ ૫૩॥

વર્ધિષ્ણુર્વરદો વૈદ્યો હરિર્નારાયણોઽચ્યુતઃ ।
અજ્ઞાનવનદાવાગ્નિઃ પ્રજ્ઞાપ્રાસાદભૂપતિઃ ॥ ૫૪॥

સર્વભૂષિતસર્વાઙ્ગઃ કર્પૂરોજ્જ્વલિતાકૃતિઃ ।
અનાદિમધ્યનિધનો ગિરિશો ગિરિજાપતિઃ ॥ ૫૫॥

વીતરાગો વિનીતાત્મા તપસ્વી ભૂતભાવનઃ ।
દેવાસુરગુરુર્ધ્યેયો(દેવો) દેવાસુરનમસ્કૃતિઃ ॥ ૫૬॥

દેવાદિદેવો દેવર્ષિર્દેવાસુરવરપ્રદઃ ।
સર્વદેવમયોઽચિન્ત્યો દેવતાત્માઽઽત્મસમ્ભવઃ ॥ ૫૭॥

નિર્લેપો નિષ્પ્રપઞ્ચાત્મા નિર્વ્યગ્રો વિઘ્નનાશનઃ ।
એકજ્યોતિર્નિરાનન્દો વ્યાપ્તમૂર્તિનાકુલઃ ॥ ૫૮॥

નિરવદ્યો બહુ(ધો)પાયો વિદ્યારાશિરકૃત્રિમઃ ।
નિત્યાનન્દઃ સુરાધ્યક્ષો નિસ્સઙ્કલ્પો નિરઞ્જનઃ ॥ ૫૯॥

નિરાતઙ્કો નિરાકારો નિષ્પ્રપઞ્ચો નિરામયઃ ।
વિદ્યાધરો વિયત્કેશો માર્કણ્ડયૌવનઃ પ્રભુઃ ॥ ૬૦॥

ભૈરવો ભૈરવીનાથઃ કામદઃ કમલાસનઃ ।
વેદવેદ્યઃ સુરાનન્દો લસજ્જ્યોતિઃ પ્રભાકરઃ ॥ ૬૧॥

ચૂડામણિઃ સુરાધીશો યક્ષગેયો હરિપ્રિયઃ ।
નિર્લેપો નીતિમાન્ સૂત્રી શ્રીહાલાહલસુન્દરઃ ॥ ૬૨॥

ધર્મરક્ષો મહારાજઃ કિરીટી વન્દિતો ગુહઃ ।
માધવો યામિનીનાથઃ શમ્બરઃ શમ્બરીપ્રિયઃ ॥ ૬૩॥

સઙ્ગીતવેત્તા લોકજ્ઞઃ શાન્તઃ કલશસમ્ભવઃ ।
બહ્મણ્યો વરદો નિત્યઃ શૂલી ગુરુપરો હરઃ ॥ ૬૪॥

માર્તાણ્ડઃ પુણ્ડરીકાક્ષઃ કર્મજ્ઞો લોકનાયકઃ ।
ત્રિવિક્રમો મુકુન્દાર્ચ્યો વૈદ્યનાથઃ પુરન્દરઃ ॥ ૬૫॥

ભાષાવિહીનો ભાષાજ્ઞો વિઘ્નેશો વિઘ્નનાશનઃ ।
કિન્નરેશો બૃહદ્ભાનુઃ શ્રીનિવાસઃ કપાલભૃત્ ॥ ૬૬॥

વિજયી ભૂતવાહશ્ચ ભીમસેનો દિવાકરઃ ।
બિલ્વપ્રિયો વસિષ્ઠેશઃ સર્વમાર્ગપ્રવર્તકઃ ॥ ૬૭॥

ઓષધીશો વામદેવો ગોવિન્દો નીલલોહિતઃ ।
ષડર્ધનયનઃ શ્રીમાન્ મહાદેવો વૃષધ્વજઃ ॥ ૬૮॥

કર્પૂરવીટિકાલોલઃ કર્પૂરવરચર્ચિતઃ ।
અવ્યાજકરુણમૂર્તિસ્ત્યાગરાજઃ ક્ષપાકરઃ ॥ ૬૯॥

આશ્ચર્યવિગ્રહઃ સૂક્ષ્મઃ સિદ્ધેશઃ સ્વર્ણભૈરવઃ ।
દેવરાજઃ કૃપાસિન્ધુરદ્વયોઽમિતવિક્રમઃ ॥ ૭૦॥

નિર્ભેદો નિત્યસત્વસ્થો નિર્યોગક્ષેમ આત્મવાન્ ।
નિરપાયો નિરાસઙ્ગો નિઃશબ્દો નિરુપાધિકઃ ॥ ૭૧॥

ભવઃ સર્વેશ્વરઃ સ્વામી ભવભીતિવિભઞ્જનઃ ।
દારિદ્ર્યતૃણકૂટાગ્નિઃ દારિતાસુરસન્તતિઃ ॥ ૭૨॥

મુક્તિદો મુદિતઃ કુબ્જો ધાર્મિકો ભક્તવત્સલઃ ।
અભ્યાસાતિશયજ્ઞેયશ્ચન્દ્રમૌલિઃ કલાધરઃ ॥ ૭૩॥

મહાબલો મહાવીર્યો વિભુઃશ્રીશઃ શુભપ્રદઃ (પ્રિયઃ) ।
સિદ્ધઃપુરાણપુરુષો રણમણ્ડલભૈરવઃ ॥ ૭૪॥

સદ્યોજાતો વટારણ્યવાસી પુરુષવલ્લભઃ ।
હરિકેશો મહાત્રાતા નીલગ્રીવઃ સુમઙ્ગલઃ ॥ ૭૫॥

હિરણ્યબાહુસ્તિગ્માંશુઃ કામેશઃ સોમવિગ્રહઃ ।
સર્વાત્મા સર્વસત્કર્તા તાણ્ડવો મુણ્ડમાલિકઃ ॥ ૭૬॥

અગ્રગણ્યઃ સુગમ્ભીરો દેશિકો વૈદિકોત્તમઃ ।
પ્રસન્નદેવો વાગીશઃ ચિન્તાતિમિરભાસ્કરઃ ॥ ૭૭॥

ગૌરીપતિસ્તુઙ્ગમૌલિઃ મખરાજો મહાકવિઃ ।
શ્રીધરઃ સર્વસિદ્ધેશો વિશ્વનાથો દયાનિધિઃ ॥ ૭૮॥

અન્તર્મુખો બહિર્દૃષ્ટિઃ સિદ્ધવેષો મનોહરઃ ।
કૃત્તિવાસાઃ કૃપાસિન્ધુર્મન્ત્રસિદ્ધો મતિપ્રદઃ ॥ ૭૯॥

મહોત્કૃષ્ટઃ પુણ્યકરો જગત્સાક્ષી સદાશિવઃ ।
મહાક્રતુર્મહાયજ્વા વિશ્વકર્મા તપોનિધિઃ ॥ ૮૦॥

છન્દોમયો મહાજ્ઞાની સર્વજ્ઞો દેવવન્દિતઃ ।
સાર્વભૌમઃ સદાનન્દઃ કરુણામૃતવારિધિઃ ॥ ૮૧ । ।
કાલકાલઃ કલિધ્વંસી જરામરણનાશકઃ ।
શિતિકણ્ઠશ્ચિદાનન્દો યોગિનીગણસેવિતઃ ॥ ૮૨॥

ચણ્ડીશઃ સુખસંવેદ્યઃ પુણ્યશ્લોકો દિવસ્પતિઃ ।
સ્થાયી સકલતત્ત્વાત્મા સદા સેવકવર્ધકઃ ॥ ૮૩॥

રોહિતાશ્વઃ ક્ષમારૂપી તપ્તચામીકરપ્રભઃ ।
ત્રિયમ્બકો વરરૂચિઃ દેવદેવશ્ચતુર્ભુજઃ ॥ ૮૪॥

વિશ્વમ્ભરો વિચિત્રાઙ્ગો વિધાતા પુરનાશ(શાસ)નઃ ।
સુબ્રહ્મણ્યો જગત્સ્વામી લોહિતાક્ષઃ શિવોત્તમઃ ॥ ૮૫॥

નક્ષત્રમાલ્યાભરણો ભગવાન્ તમસઃ પરઃ ।
વિધિકર્તા વિધાનજ્ઞઃ પ્રધાનપુરુષેશ્વરઃ ॥ ૮૬॥

ચિન્તામણિઃ સુરગુરુર્ધ્યેયો નીરાજનપ્રિયઃ ।
ગોવિન્દો રાજરાજેશો બહુપુષ્પાર્ચનપ્રિયઃ ॥ ૮૭॥

સર્વાનન્દો દયારૂપી શૈલજાસુમનોહરઃ ।
સુવિક્રમઃ સર્વગતો હેતુસાધનવર્જિતઃ ॥ ૮૮॥

વૃષાઙ્કો રમણીયાઙ્ગઃ સત્કર્તા સામપારગઃ ।
ચિન્તાશોકપ્રશમનઃ સર્વવિદ્યાવિશારદઃ ॥ ૮૯॥

ભક્તવિજ્ઞપ્તિસન્ધાતા વક્તા ગિરિવરાકૃતિઃ ।
જ્ઞાનપ્રદો મનોવાસઃ ક્ષેમ્યો મોહવિનાશનઃ ॥ ૯૦॥

સુરોત્તમશ્ચિત્રભાનુઃ સદા વૈભવતત્પરઃ ।
સુહૃદગ્રેસરઃ સિદ્ધો જ્ઞાનમુદ્રો ગણાધિપઃ ॥ ૯૧॥

અમરશ્ચર્મવસનો વાઞ્છિતાર્થફલપ્રદઃ ।
અસમાનોઽન્તરહિતો દેવસિંહાસનાધિપઃ ॥ ૯૨॥

વિવાદહન્તા સર્વાત્મા કાલઃ કાલવિવર્જિતઃ ।

વિશ્વાતીતો વિશ્વકર્તા વિશ્વેશો વિશ્વકારણઃ ॥ ૯૩॥

યોગિધ્યેયો યોગનિષ્ઠો યોગાત્મા યોગવિત્તમઃ ।
ઓઙ્કારરૂપો ભગવાન્ બિન્દુનાદમયઃ શિવઃ ॥ ૯૪॥

ચતુર્મુખાદિસંસ્તુત્યશ્ચતુર્વર્ગફલપ્રદઃ ।
સહયાચલગુહાવાસી સાક્ષાન્મોક્ષરસાકૃતિઃ ॥ ૯૫॥

દક્ષાધ્વરસમુચ્છેત્તા પક્ષપાતવિવર્જિતઃ ।
ઓઙ્કારવાચકઃ શમ્ભુઃ શઙ્કરઃ શશિશીતલઃ ॥ ૯૬॥

પઙ્કજાસનસંસેવ્યઃ કિઙ્કરામરવત્સલઃ ।
નતદૌર્ભાગ્યતૂલાગ્નિઃ કૃતકૌતુકવિભ્રમઃ ॥ ૯૭॥

ત્રિલોકમોહનઃ શ્રીમાન્ ત્રિપુણ્ડ્રાઙ્કિતમસ્તકઃ ।
ક્રૌઞ્ચરિજનકઃ શ્રીમદ્ગણનાથસુતાન્વિતઃ ॥ ૯૮॥

અદ્ભુતોઽનન્તવરદોઽપરિચ્છેદ્યાત્મવૈભવઃ ।
ઇષ્ટામૂર્તપ્રિયઃ શર્વ એકવીરપ્રિયંવદઃ ॥ ૯૯॥

ઊહાપોહવિનિર્મુક્ત ઓઙ્કારેશ્વરપૂજિતઃ ।
કલાનિધિઃ કીર્તિનાથઃ કામેશીહૃદયઙ્ગમઃ ॥ ૧૦૦॥

કામેશ્વરઃ કામરૂપો ગણનાથસહોદરઃ ।
ગાઢો ગગનગમ્ભીરો ગોપાલો ગોચરો ગુરુઃ ॥ ૧૦૧॥

ગણેશો ગાયકો ગોપ્તા ગાણાપત્યગણપ્રિયઃ ।
ઘણ્ટાનિનાદરુચિરઃ કર્ણલજ્જાવિભઞ્જનઃ ॥ ૧૦૨॥

કેશવઃ કેવલઃ કાન્તશ્ચક્રપાણિશ્ચરાચરઃ ।
ઘનાઘનો ઘોષયુક્તશ્ચણ્ડીહૃદયનન્દનઃ ॥ ૧૦૩॥

ચિત્રાર્પિતશ્ચિત્રમયઃ ચિન્તિતાર્થપ્રદાયકઃ ।
છદ્મચારી છદ્મગતિઃ ચિદાભાસશ્ચિદાત્મકઃ ॥ ૧૦૪॥

છન્દોમયશ્છત્રપતિઃ છન્દઃશાસ્ત્રવિશારદઃ ।
જીવનો જીવનાધારો જ્યોતિઃશાસ્ત્રવિશારદઃ ॥ ૧૦૫॥

જ્યોતિર્જ્યોત્સ્નામયો જેતા જીમૂતવરદાયકઃ ।
જનાઘનાશનો જીવો જીવદો જીવનૌષધમ્ ॥ ૧૦૬॥

જરાહરો જાડ્યહરો જ્યોત્સ્નાજાલપ્રવર્તકઃ ।
જ્ઞાનેશ્વરો જ્ઞાનગમ્યો જ્ઞાનમાર્ગપરાયણઃ ॥ ૧૦૭॥

તરુસ્થસ્તરુમધ્યસ્થો ડામરીશક્તિરઞ્જકઃ ।
તારકસ્તારતમ્યાત્મા ટીપસ્તર્પણકારકઃ ॥ ૧૦૮॥

તુષારાચલમધ્યસ્થસ્તુષારકરભૂષણઃ ।
ત્રિસુગન્ધસ્ત્રિમૂર્તિશ્ચ ત્રિમુખસ્ત્રિકકુદ્ધરઃ ॥ ૧૦૯॥

ત્રિલોકીમુદ્રિકાભૂષઃ ત્રિકાલજ્ઞસ્ત્રયીમયઃ ।
તત્ત્વરૂપસ્તરુસ્થાયી તન્ત્રીવાદનતત્પરઃ ॥ ૧૧૦॥

અદ્ભુતાનન્તસઙ્ગ્રામો ઢક્કાવાદનતત્પરઃ (કૌતુકઃ) ।
તુષ્ટસ્તુષ્ટિમયઃ સ્તોત્રપાઠકોઽતિ(કાતિ)પ્રિયસ્તવઃ ॥ ૧૧૧॥

તીર્થપ્રિયસ્તીર્થરતઃ તીર્થાટનપરાયણઃ ।
તૈલદીપપ્રિયસ્તૈલપક્કાન્નપ્રીતમાનસઃ ॥ ૧૧૨॥

તૈલાભિષેકસન્તુષ્ટસ્તિલચર્વણતત્પરઃ ।
દીનાર્તિહૃદ્દીનબન્ધુર્દીનનાથો દયાપરઃ ॥ ૧૧૩॥

દનુજારિર્દુઃખહન્તા દુષ્ટભૂતનિષૂદનઃ ।
દીનોરુદાયકો દાન્તો દીપ્તિમાન્દિવ્યલોચનઃ ॥ ૧૧૪॥

દેદીપ્યમાનો દુર્જ્ઞેયો દીનસમ્માનતોષિતઃ ।
દક્ષિણાપ્રેમસન્તુષ્ટો દારિદ્ર્યબડબાનલઃ ॥ ૧૧૫॥

ધર્મો ધર્મપ્રદો ધ્યેયો ધીમાન્ધૈર્યવિભૂષિતઃ ।
નાનારૂપધરો નમ્રો નદીપુલિનસંશ્રિતઃ ॥ ૧૧૬॥

નટપ્રિયો નાટ્યકરો નારીમાનસમોહનઃ ।
નારદો નામરહિતો નાનામન્ત્રરહસ્યવિત્ ॥ ૧૧૭॥

પતિઃ પાતિત્યસંહર્તા પરવિદ્યાવિકર્ષકઃ ।
પુરાણપુરુષઃ પુણ્યઃ પદ્યગદ્યપ્રદાયકઃ ॥ ૧૧૮॥

પાર્વતીરમણઃ પૂર્ણઃ પુરાણાગમસૂચકઃ ।
પશૂપહારરસિકઃ પુત્રદઃ પુત્રપૂજિતઃ ॥ ૧૧૯॥

બ્રહ્માણ્ડભેદનો બ્રહ્મજ્ઞાની બ્રાહ્મણપાલકઃ ।
ભૂતાધ્યક્ષો ભૂતપતિર્ભૂતભીતિનિવારણઃ ॥ ૧૨૦॥

ભદ્રાકારો ભીમગર્ભો ભીમસઙ્ગ્રામલોલુપઃ ।
ભસ્મભૂષો ભસ્મસંસ્થો ભૈક્ષ્યકર્મપરાયણઃ ॥ ૧૨૧॥

ભાનુભૂષો ભાનુરૂપો ભવાનીપ્રીતિદાયકઃ ।
ભવપ્રિયો ભાવરતો ભાવાભાવવિવર્જિતઃ ॥ ૧૨૨॥

ભ્રાજિષ્ણુજી(ર્જી)વસન્તુષ્ટો ભટ્ટારો ભદ્રવાહનઃ ।
ભદ્રદો ભ્રાન્તિરહિતો ભીમચણ્ડીપતિર્મહાન્ ॥ ૧૨૩॥

યજુર્વેદપ્રિયો યાજી યમસંયમસંયુતઃ ।
રામપૂજ્યો રામનાથો રત્નદો રત્નહારકઃ ॥ ૧૨૪॥

રાજ્યદો રામવરદો રઞ્જકો રતિમાર્ગધૃત્ ।
રામાનન્દમયો રમ્યો રાજરાજેશ્વરો રસઃ ॥ ૧૨૫॥

રત્નમન્દિરમધ્યસ્થો રત્નપૂજાપરાયણઃ ।
રત્નાકારો લક્ષણેશો લક્ષ્યદો લક્ષ્યલક્ષણઃ ॥ ૧૨૬॥

લોલાક્ષીનાયકો લોભી લક્ષમન્ત્રજપપ્રિયઃ ।
લમ્બિકામાર્ગનિરતો લક્ષ્યકોટ્યણ્ડનાયકઃ ॥ ૧૨૭॥

વિદ્યાપ્રદો વીતિહોતા વીરવિદ્યાવિકર્ષકઃ ।
વારાહીપાલકો વન્દ્યો વનવાસી વનપ્રિયઃ ॥ ૧૨૮॥

વનેચરો વનચરઃ શક્તિપૂજ્યઃ શિખિપ્રિયઃ ।
શરચ્ચન્દ્રનિભઃ શાન્તઃ શક્તઃ સંશયવર્જિતઃ ॥ ૧૨૯॥

શાપાનુગ્રહદઃ શઙ્ખપ્રિયઃ શત્રુનિષૂદનઃ ।
ષટ્કૃત્તિકાસુસમ્પૂજ્યઃ ષટ્શાસ્ત્રાર્થરહસ્યવિત્ ॥ ૧૩૦॥

સુભગઃ સર્વજિત્સૌમ્યઃ સિદ્ધમાર્ગપ્રવર્તકઃ ।
સહજાનન્દદઃ સોમઃ સર્વશાસ્ત્ર રહસ્યવિત્ ॥ ૧૩૧॥

સર્વજિત્સર્વવિત્સાધુઃ સર્વધર્મ સમન્વિતઃ ।
સર્વાધ્યક્ષઃ સર્વદેવો મહર્ષિર્મોહનાસ્ત્રવિત્ ॥ ૧૩૨ । ।
ક્ષેમઙ્કરઃ ક્ષેત્રપાલઃ ક્ષયરોગક્ષયઙ્કરઃ ।
નિઃ સીમમહિમા નિત્યો લીલાવિગ્રહરૂપધૃત્ ॥ ૧૩૩ । ।
ચન્દનદ્રવદિગ્ધાઙ્ગઃ ચામ્પેયકુસુમપ્રિયઃ ।

સમસ્તભક્તસુખદઃ પરમાણુર્મહાહ્રદઃ ॥ ૧૩૪ । ।
આકાશગો દુષ્પ્રધર્ષઃ કપિલઃ કાલકન્ધરઃ ।
કર્પૂગૌરઃ કુશલઃ સત્યસન્ધો જિતેન્દ્રિયઃ ॥ ૧૩૫ । ।
શાશ્વતૈશ્વર્યવિભવઃ પુષ્કરઃ સુસમાહિતઃ ।
મહર્ષિઃ પણ્ડિતો બ્રહ્મયોનિઃ સર્વોત્તમોત્તમઃ ॥ ૧૩૬ । ।
ભૂમિભારાર્તિસંહર્તા ષડૂર્મિરહિતો મૃડઃ ।
ત્રિવિષ્ટપેશ્વરઃ સર્વહૃદયામ્બુજમધ્યગઃ ॥ ૧૩૭ । ।
સહસ્રદલપદ્મસ્થઃ સર્વવર્ણોપશોભિતઃ ।
પુણ્યમૂર્તિઃ પુણ્યલભ્યઃ પુણ્યશ્રવણકીર્તનઃ ॥ ૧૩૮ । ।
સૂર્યમણ્ડલમધ્યસ્થશ્ચન્દ્રમણ્ડલમધ્યગઃ ।
સદ્ભક્તધ્યાનનિગલઃ શરણાગતપાલકઃ ॥ ૧૩૯ । ।
શ્વેતાતપત્રરુચિરઃ શ્વેતચામરવીજિતઃ ।
સર્વાવયસમ્પૂર્ણઃ સર્વલક્ષણલક્ષિતઃ ॥ ૧૪૦ । ।
સર્વમઙ્ગલામાઙ્ગલ્યઃ સર્વકારણકારણમ્ ।
આમોદમોદજનકઃ સર્પરાજોત્તરીયકઃ ॥ ૧૪૧ । ।
કપાલી ગોવિન્દસિદ્ધઃ કાન્તિસંવલિતાનનઃ ।
સર્વસદ્ગુરુસંસેવ્યો દિવ્યચન્દનચર્ચિતઃ ॥ ૧૪૨ । ।
વિલાસિનીકૃતોલ્લાસઃ ઇચ્છાશક્તિનિષેવિતઃ ।
અનન્તોઽનન્તસુખદો નન્દનઃ શ્રીનિકેતનઃ ॥ ૧૪૩ ॥

અમૃતાબ્ધિકૃતાવાસો (તોલ્લાસી) નિત્યક્લિન્નો નિરામયઃ ।
અનપાયોઽનન્તદૃષ્ટિઃ અપ્રમેયોઽજરોઽમરઃ ॥ ૧૪૪ ॥

અનામયોઽપ્રતિહતશ્ચાઽપ્રતર્ક્યોઽમૃતોઽક્ષરઃ ।
અમોઘસિદ્ધિરાધાર આધારાધેયવર્જિતઃ ॥ ૧૪૫ ॥

ઈષણાત્રયનિર્મુક્ત ઈહામાત્રવિવર્જિતઃ ।
ઋગ્યજુઃસામનયન ઋદ્ધિસિદ્ધિસમૃદ્ધિદઃ ॥ ૧૪૬ ॥

ઔદાર્યનિધિરાપૂર્ણ ઐહિકામુષ્મિકપ્રદઃ ।
શુદ્ધસન્માત્રસંવિત્તાસ્વરૂપસુ(મુ)ખવિગ્રહઃ ॥ ૧૪૭ ॥

દર્શનપ્રથમાભાસો દુષ્ટદર્શનવર્જિતઃ ।
અગ્રગણ્યોઽચિન્ત્યરૂપઃ કલિકલ્મષનાશનઃ ॥ ૧૪૮ ॥

વિમર્શરૂપો વિમલો નિત્યતૃપ્તો નિરાશ્રયઃ ।

નિત્યશુદ્ધો નિત્યબુદ્ધો નિત્યમુક્તો નિરાવૃતઃ ॥ ૧૪૯॥

મૈત્ર્યાદિવાસનાલભ્યો મહાપ્રલયસંસ્થિતઃ ।
મહાકૈલાસનિલયઃ પ્રજ્ઞાનઘનવિગ્રહઃ ॥ ૧૫૦॥

શ્રીમદ્વ્યાઘ્રપુરાવાસો ભુક્તિમુક્તિફલપ્રદઃ ।
જગદ્યોનિર્જગત્સાક્ષી જગદીશો જગન્મયઃ ॥ ૧૫૧॥

જપો જપપરો જપ્યો વિદ્યાસિંહાસનપ્રભુઃ ।
તત્ત્વાનાં પ્રકૃતિસ્તત્ત્વં તત્ત્વમ્પદનિરૂપિતઃ ॥ ૧૫૨॥

દિક્કાલાદ્યનવચ્છિન્નઃ સહજાનન્દસાગરઃ ।
પ્રકૃતિઃ પ્રાકૃતાતીતઃ પ્રજ્ઞાનૈકરસાકૃતિઃ ॥ ૧૫૩॥

નિઃશઙ્કમતિદૂરસ્થઃ ચેત્યચેતનચિન્તકઃ ।
તારકાન્તરસંસ્થાનસ્તારકસ્તારકાન્તકઃ ॥ ૧૫૪॥

ધ્યાનૈકપ્રકટો ધ્યેયો ધ્યાનં (ની) ધ્યાનવિભૂષણઃ ।
પરં વ્યોમ પરં ધામ પરમાણુઃ પરં પદમ્ ॥ ૧૫૫॥

પૂર્ણાનન્દઃ સદાનન્દો નાદમધ્યપ્રતિષ્ઠિતઃ ।
પ્રમાવિપર્યયા(ણપ્રત્યયા)તીતઃ પ્રણતાજ્ઞાનનાશકઃ ॥ ૧૫૬॥

બાણાર્ચિતાઙ્ઘ્રિર્બહુદો બાલકેલિકુતૂહલઃ ।
બૃહત્તમો બ્રહ્મપદો બ્રહ્મવિદ્બ્રહ્મવિત્પ્રિયઃ ॥ ૧૫૭॥

ભ્રૂક્ષેપદત્તલક્ષ્મીકો ભ્રૂમધ્યધ્યાનલક્ષિતઃ ।
યશસ્કરો રત્નગર્ભો મહારાજ્યસુખ પ્રદઃ ॥ ૧૫૮॥

શબ્દબ્રહ્મ શમપ્રાપ્યો લાભકૃલ્લોકવિશ્રુતઃ ।
શાસ્તા શિખાગ્રનિલયઃ શરણ્યો યાજકપ્રિયઃ ॥ ૧૫૯॥

સંસારવૈદ્યઃ સર્વજ્ઞઃ સર્વભેષજભેષજમ્ ।
મનોવાચાભિરગ્રાહ્યઃ પઞ્ચકોશવિલક્ષણઃ ॥ ૧૬૦॥

અવસ્થાત્રયનિર્મુક્તસ્ત્વક્સ્થઃ સાક્ષી તુરીયકઃ ।
પઞ્ચભૂતાદિદૂરસ્થઃ પ્રત્યગેકરસોઽવ્યયઃ ॥ ૧૬૧॥

ષટ્ચક્રાન્તઃકૃતોલ્લાસઃ ષડ્વિકારવિવર્જિતઃ ।
વિજ્ઞાનઘનસમ્પૂર્ણો વીણાવાદનતત્પરઃ ॥ ૧૬૨॥

નીહારાકારગૌરાઙ્ગો મહાલાવણ્યવારિધિઃ ।
પરાભિચારશમનઃ ષડધ્વોપરિ સંસ્થિતઃ ॥ ૧૬૩॥

સુષુમ્નામાર્ગ સઞ્ચારી બિસતન્તુનિભાકૃતિઃ ।
પિનાકી લિઙ્ગરૂપઃ શ્રીમઙ્ગલાવયવોજ્જ્વલઃ ॥ ૧૬૪॥

ક્ષેત્રાધિપઃ સુસંવેદ્યઃ શ્રીપ્રદો વિભવપ્રદઃ ।
સર્વવશ્યકરઃ સર્વતોષકઃ પુત્રપૌત્રિદઃ ।
આત્મનાથસ્તીર્થનાથઃ સપ્ત(પ્તિ)નાથઃ સદાશિવઃ ॥ ૧૬૫॥

Proofread by Sivakumar Thyagarajan shivakumar24 at gmail.com

kShetra name: shivapuram tiruperunthuRai
turiyAteeta kShetra, shrI ShodashAnta mahAsthAnam - shrI AtmanAtha

---

*ShridakShinamUrtisahasranamastotram 2*
pdf was typeset on March 11, 2023

Please send corrections to *sanskrit@cheerful.com*